# Shri Kalika kavacham 2

# શ્રીકાલિકાકવચમ્ ૨

## Document Information

Text title : kAlikAkavacham 2

File name : kAlikAkavacham2.itx

Category : kavacha, devii, dashamahAvidyA, devI

Location : doc_devii

Author : Traditional

Transliterated by : Anu Sriram anu_sriramb at yahoo.com

Proofread by : Anu Sriram, PSA Easwaran

Description-comments : mahAnirvANatantre saptama ullAse 5566 shloka

Latest update : May 5, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 2, 2024

*sanskritdocuments.org*

# Shri Kalika kavacham 2

## શ્રીકાલિકાકવચમ્ ૨

અથવા શ્રીત્રૈલોક્ય વિજય કવચમ્

શ્રીસદાશિવ ઉવાચ -

કથિતં પરમં બ્રહ્મ પ્રકૃતેઃ સ્તવનં મહત્ ।
આદ્યાયાઃ શ્રીકાલિકાયાઃ કવચં શ‍ૃણુ સામ્પ્રતમ્ ॥ ૧॥

ત્રૈલોક્યવિજયસ્યાસ્ય કવચસ્ય ઋષિઃ શિવઃ ।
છન્દોઽનુષ્ટુબ્દેવતા ચ આદ્યા કાલી પ્રકીર્તિતા ॥ ૨॥

માયાબીજં બીજમિતિ રમા શક્તિરુદાહૃતા ।
ક્રીં કીલકં કામ્યસિદ્ધૌ વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૩॥

હ્રીમાદ્યા મે શિરઃ પાતુ શ્રીં કાલી વદનં મમ ।
હૃદયં ક્રીં પરા શક્તિઃ પાયાત્કણ્ઠં પરાત્પરા ॥ ૪॥

નેત્રે પાતુ જગદ્ધાત્રી કર્ણૌ રક્ષતુ શઙ્કરી ।
ઘ્રાણં પાતુ મહામાયા રસનાં સર્વમઙ્ગલા ॥ ૫॥

દન્તાન્ રક્ષતુ કૌમારી કપોલૌ કમલાલયા ।
ઓષ્ઠાધરૌ ક્ષમા રક્ષેચ્ચિબુકં ચારુહાસિની ॥ ૬॥

ગ્રીવાં પાયાત્કુલેશાની કકુત્પાતુ કૃપામયી ।
દ્વૌ બાહૂ બાહુદા રક્ષેત્કરૌ કૈવલ્યદાયિની ॥ ૭॥

સ્કન્ધૌ કપર્દિની પાતુ પૃષ્ઠં ત્રૈલોક્યતારિણી ।
પાર્શ્વે પાયાદપર્ણા મે કટિં મે કમઠાસના ॥ ૮॥

નાભૌ પાતુ વિશાલાક્ષી પ્રજસ્થાનં પ્રભાવતી ।
ઊરૂ રક્ષતુ કલ્યાણી પાદૌ મે પાતુ પાર્વતી ॥ ૯॥

જયદુર્ગાવતુ પ્રાણાન્સર્વાઙ્ગં સર્વસિધ્દિદા ।
રક્ષાહીનં તુ યત્સ્થાનં વર્જિતં કવચેન ચ ॥ ૧૦॥

તત્સર્વં મે સદા રક્ષેદાદ્યા કાલી સનાતની ।
ઇતિ તે કથિતં દિવ્યં ત્રૈલોક્યવિજયાભિધમ્ ॥ ૧૧॥

કવચં કાલિકાદેવ્યા આદ્યાયાઃ પરમાદ્ભુતમ્ ।
પૂજાકાલે પઠેત્યસ્તુ આદ્યાધિકૃતમાનસઃ ॥ ૧૨॥

ઇતિ મહાનિર્વાણતન્ત્રે સપ્તમ ઉલ્લાસે ૫૫-૬૬ શ્લોકપર્યન્તં
શ્રીકાલિકાકવચં સમ્પૂર્ણમ્ ।

Encoded by Anu Sriram anu underscore sriramb at yahoo.com
Proofread by Anu Sriram, PSA Easwaran

---

*Shri Kalika kavacham 2*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*